# Brahmaproktam Suryanamavarnana Stotram

# ब्रह्मप्रोक्तं सूर्यनामवर्णनस्तोत्रम्

## Document Information

Text title : Brahmaproktam Suryanamavarnana Stotram

File name : brahmaproktaMsUryanAmavarNanastotram.itx

Category : navagraha, bhaviShyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | brAhmaparva | adhyAya 71/2-16||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 7, 2024

*sanskritdocuments.org*

# ब्रह्मप्रोक्तं सूर्यनामवर्णनस्तोत्रम्

ब्रह्मोवाच ।
नामभिः संस्तुतो देवो यैरर्कः परितुष्यति ।
तानि ते कीर्तयाम्येष यथावदनुपूर्वशः ॥ १॥

नमः सूर्याय नित्याय रवये कार्यभानवे ।
भास्कराय मतङ्गाय मार्तण्डाय विवस्वते ॥ २॥

आदित्यायादिदेवाय नमस्ते रश्मिमालिने ।
दिवाकराय दीप्ताय अग्नये मिहिराय च ॥ ३॥

प्रभाकराय मित्राय नमस्तेऽदितिसम्भव ।
नमो गोपतये नित्यं दिशां च पतये नमः ॥ ४॥

नमो धात्रे विधात्रे च अर्यम्णे वरुणाय च ।
पूष्णे भगाय मित्राय पर्जन्यायांशवे नमः ॥ ५॥

नमो हितकृते नित्यं धर्माय तपनाय च ।
हरये हरिताश्वाय विश्वस्य पतये नमः ॥ ६॥

विष्णवे ब्रह्मणे नित्यं त्र्यम्बकाय तथात्मने ।
नमस्ते सप्तलोकेश नमस्ते सप्तसप्तये ॥ ७॥

एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च ।
ज्योतिषां पतये नित्यं सर्वप्राणभृते नमः ॥ ८॥

हिताय सर्वभूतानां शिवायार्तिहराय च ।
नमः पद्मप्रबोधाय नमो वेदादिमूर्तये ॥ ९॥

काधिजाय नमस्तुभ्यं नमस्तारासुताय च ।
भीमजाय नमस्तुभ्यं पावकाय च वै नमः ॥ १०॥

धिषणाय नमो नित्यं नमः कृष्णाय नित्यदा ।

नमोऽस्त्वदितिपुत्राय नमो लक्ष्याय नित्यशः ॥ ११॥

एतान्यादित्यनामानि मया प्रोक्तानि वै पुरा ।
आराधनाय देवस्य सर्वकामेन सुव्रत ॥ १२॥

सायं प्रातः शुचिर्भूत्वा यः पठेत्सुसमाहितः ।
स प्राप्नोत्यखिलान्कामान्यथाहं प्राप्तवान्पुरा ॥ १३॥

प्रसादात्तस्य देवस्य भास्करस्य महात्मनः ।
श्रीकामः श्रियमाप्नोति धर्मार्थी धर्ममाप्नुयात् ॥ १४॥

आतुरो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
राज्यार्थी राज्यमाप्नोति कामार्थी काममाप्नुयात् ॥ १५॥

एतज्जप्यं रहस्यं च सन्ध्योपासनमेव च ।
एतेन जपमात्रेण नरः पापात्प्रमुच्यते ॥ १६॥

इति श्रीभविष्येपुराणे ब्राह्मे पर्वणि एकसप्ततितमाध्यायान्तर्गतं
ब्रह्मप्रोक्तसूर्यनामवर्णनं समाप्तम् ।

भविष्यपुराण । ब्राह्मपर्व । अध्याय ७१/२-१६ ॥

bhaviShyapurANa . brAhmaparva . adhyAya 71/2-16..

Proofread by PSA Easwaran

---

*Brahmaproktam Suryanamavarnana Stotram*

pdf was typeset on October 7, 2024

Please send corrections to *sanskrit@cheerful.com*